CAREERINDIA

**Code No. 09**

Total No. of Questions : 46 ] [ Total No. of Printed Pages : 7

**June/July, 2009**

# SANSKRIT

Time : 3 Hours 15 Minutes ] [ Max. Marks : 100

I. एतेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत — 10 × 1 = 10

1) नगराणि कथं प्रवेष्टव्यानि ?

2) कीदृश्यः प्रजाः विलयं यान्ति ?

3) कौसल्यापुरोगैः सर्वैः कुत्र गन्तव्यम् ?

4) श्रीहर्षदेव विरचितानि नाटकानि कानि ?

5) सुसङ्गता रत्नमालां कस्मै ददाति ?

6) रत्नबाहुल्यं कुत्र वर्तते ?

7) भरतवंशप्रदीपाः इति विश्रुताः के ?

8) एकचक्रानगरे पाण्डवानां जीवनोपायः कः आसीत् ?

9) दुरतिक्रमं किम् ?

10) बकः कथं मारितः ?

www.careerindia.com

[ Turn over

CAREERINDIA



II. एतेषु **त्रयाणां** भाषान्तरं कृत्वा भावं विशदयत — 3 × 4 = 12

11) इदं गृहं तत्प्रतिमानृपस्य नः
समुच्छ्रयो यस्य स हर्म्यदुर्लभः ।
अयन्त्रितैरप्रतिहारिकागतैः
विना प्रणामं पथिकैरुपास्यते ॥

12) सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकं
वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः ।
प्रत्यापत्तिमुपागता न हि तथा देवी रुदत्य यथा
प्रक्षालयेव तयैव बाष्पसलिलैः कोपोऽपनीतः स्वयम् ॥

13) विवृद्धिं कम्पस्य प्रथयतितरां साध्वसवशात्
अविस्पष्टां दृष्टिं तिरयतितरां बाष्पपटलैः ।
स्खलद्वर्णां वाणीं जडयतितरां गद्गदतया
जरायाः साहाय्यं मम हि परितोषोऽद्य कुरुते ॥

14) न मानुषी वदत्येवं देवता प्रतिभासि मे ।
स्थाने मया तपस्तप्तं येनेदानीं प्रसीदसि ॥

15) भीमस्य शत्रुगणमर्दनगर्धनस्य
सिंहस्य मत्तगजपाटनलम्पटस्य ।
किं मूढ शस्त्रकथया ननु वज्रकल्पः
त्वन्मस्तकास्थिभिदुरोऽस्ति ममैष मुष्टिः ॥

www.careerindia.com

CAREERINDIA



III. अ) **एकस्य** उत्तरं संस्कृतभाषायां, प्रादेशिकभाषायाम् , आंग्लभाषायां वा प्रबन्धरूपेण लिखत — 1 × 8 = 8

16) भरतस्य पात्रचित्रणं कुरुत ।

17) अग्निदाहप्रसङ्गस्य नाटकीय वैशिष्ट्यं निरूपयत ।

आ) **द्वयोः** टिप्पण्यौ संस्कृतभाषायां, प्रादेशिकभाषायाम् , आंग्लभाषायां वा लिखत — 2 × 4 = 8

18) वासवदत्ता ।

19) भरतवाक्यम् ।

20) बकासुरः ।

21) भीमबकयोः संवादः ।

IV. **चतुर्णां** सन्दर्भं संस्कृतभाषायां सूचयत — 4 × 3 = 12

22) गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता ।

23) भर्तृद्रोहादस्तु माताप्यमाता ।

24) अतिनिर्घृणं खलु कृतं देव्या ।

25) व्यक्तं लग्नोऽपि भवतीं न दहत्येव पावकः ।

26) न हि व्याघ्रो हरिणीमनुकम्पमानो दृष्टः ।

27) चिरान्विष्टो मृगः स्वयमुत्पतितो व्याघ्रगह्वरम् ।

V. अ) **एकस्य** उत्तरं संस्कृतभाषायां, प्रादेशिकभाषायाम् , आंग्लभाषायां वा प्रबन्धरूपेण लिखत — 1 × 10 = 10

28) त्रीणि अङ्गुलीयकानि इति कथां सङ्ग्रहेण निरूपयत ।

29) जम्बुकः मानवजन्मनः श्रेष्ठत्वं कथं प्रतिपादयति ?



www.careerindia.com

CAREERINDIA



आ) **द्वयोः** लघुटिप्पण्यौ संस्कृतभाषायां, प्रादेशिकभाषायाम् , आङ्ग्लभाषायां वा लिखत —

2 × 5 = 10

30) पुरोहितः ।

31) दुष्टबुद्धिः ।

32) विषया ।

33) सलादीनः ।

VI. **पञ्चानां** उपप्रश्नानां उत्तराणि संस्कृतभाषायां लिखत — 5 × 2 = 10

34) **द्वयोः** सन्धिं विभज्य नाम लिखत —

इत्यस्ति, मैव, प्रायोऽपि, यन्मया ।

35) **द्वयोः** लिङ्गविभक्तिवचनानि लिखत —

आशा, मनसा, प्रियायाः, काले ।

36) **द्वयोः** लकारपुरुषवचनानि लिखत —

ताडयति, प्रणमत, यास्यामि, अभवम् ।

37) **द्वयोः** विग्रहवाक्यं लिखत —

अकल्यशरीरः, महाराजः, भीमजननी, नकुलसहदेवौ ।

38) **द्वयोः** व्याकरणरीत्या पदपरिचयं कुरुत —

स्मृत्वा, श्रोतुम् , शोभमाना, सर्वदा ।

39) प्रयोगपरिवर्तनं कुरुत —

दुर्योधनो निद्रां न लभते ।

**अथवा**

मया हन्यते ।

www.careerindia.com

CAREERINDIA



40) व्याकरणविशेषं विशदयत —

i) गच्छति स्म ।

ii) मया सह ।

41) अत्रत्यमलङ्कारं सलक्षणं निर्दिशत —

मन्ये मम प्रियतमा हृदयं प्रविष्टा ।

VII. 42) संस्कृतभाषायां अनुवदत — 5

ಒಬ್ಬ ಭಿಕ್ಷುಕನು ತಾನು ಮೂಕನಂತೆ ನಟಿಸಿದರೆ ಹೆಚ್ಚು ಹಣ ಸಂಪಾದಿಸುವೆನೆಂದು ಒಮ್ಮೆ ಆಲೋಚಿಸಿದನು. ಆದ್ದರಿಂದ 'ಮೂಗ' ಎಂದು ಹಲಗೆಯ ಮೇಲೆ ಬರೆಸಿ ಅದನ್ನು ತನ್ನ ಕೊರಳಲ್ಲಿ ಹಾಕಿಕೊಂಡನು. ಅವನ ವೈರಿಯಾದ ಮತ್ತೊಬ್ಬ ಭಿಕ್ಷುಕನು ಈ ಮೋಸಗಾರನನ್ನು ಶಿಕ್ಷಿಸಬೇಕೆಂದು ನಿರ್ಧರಿಸಿದನು. ಆದ್ದರಿಂದ ಅವನ ಸಮೀಪದಲ್ಲಿ ಕುಳಿತುಕೊಂಡನು. ಒಬ್ಬ ಸಭ್ಯ ಗೃಹಸ್ಥನು ಒಂದು ನಾಣ್ಯವನ್ನು ನಟನೆ ಮಾಡುವವನಿಗೆ ಹಾಕಿದಾಗ ಅವನು ಹೇಳಿದನು – 'ಅಯ್ಯಾ, ಅವನೊಬ್ಬ ವಂಚಕನು. ಮೂಕನಲ್ಲವೇ ಅಲ್ಲ'. ಮೊದಲನೆಯ ಭಿಕ್ಷುಕನು ಸಿಟ್ಟಿನಿಂದ ಕೂಗಿದನು. 'ಅಸತ್ಯ ನುಡಿಯುವವನೇ, ನಾನು ಎಂದೆಂದಿಗೂ ಮೂಕನಿದ್ದೇನೆ! ಈಗಲೂ ಸಹ!'

A beggar, once thought, he would get more money, if he pretended to be dumb. So he had 'Dumb' written on a board and hung it round his neck. Another beggar, who was his enemy, made up his mind to punish the cheat. So he sat near him. When a gentleman offered a coin to the pretender he said, "Sir, he is a rogue and he is not dumb at all". The first beggar in rage shouted "Liar, I have always been dumb and am so now".



www.careerindia.com

CAREERINDIA



43) परिच्छेदमिमं पठित्वा प्रश्नानामुत्तराणि लिखत — 5 × 1 = 5

अयं महात्मा विज्ञानतल्लजः । बाल्येऽसौ अध्ययनकाले नातीव पटुः । अलस शिरोमणिः चासीत् । एकस्मिन् दिने मल्लयुद्धे सः ब्रह्मचारिणमेकं जिगाय । तदा तस्मिन्नजायत कोऽप्युत्साहः । ततः पश्चात् स्वधीतं तेन । कालेन मेधाविनां विद्यार्थिनां धुरिकीर्तनीयोऽभूत् । कदाचिदयं श्रान्तः वृक्षमूलमध्यशेत । शयनस्योपरि फलमेकं निपपात । प्रबुद्धोऽसौ चिन्तयामास । कस्मादिदं फलं वृक्षाच्च्युतं भूमावेव पतति ? न कदाचिदूर्ध्वं गच्छति । तस्मिन् काले प्रश्नोऽयं दुरुत्तरमासीत् । न कोऽपि विज्ञानी तदानीन्तनः तत्त्वतः फलहेतुं व्यजानात् । न्यूटन् महोदयस्तु ध्यायं ध्यायं भूमिपतनहेतुं समर्थयामास । अस्ति कापि शक्तिः भूमेः यया उपरिगतं समस्तं वस्तु निपतति । ऊर्ध्वमुत्क्षिप्तं वस्तु स्वयं न निपतति । किन्तु तत्पातयति पृथिवी गुरुत्वाकर्षणशक्त्येति स्वोपज्ञं सिद्धान्तं प्रतिपादयामास प्रसारायामास च । शारदचन्द्रिकाधवलं यशश्चक्रे ।

i) परिच्छेदेऽस्मिन् विज्ञानतल्लजः कः ?

ii) सः बाल्ये कथमासीत् ?

iii) फलं कुत्र निपपात ?

iv) पृथिवी कया शक्त्या वस्तूनि पातयति ?

v) तस्य यशः कथम् वर्णितम् ?

**अथवा**

पुस्तकप्रेषणाय आवेदनं कृत्वा ग्रन्थालयस्य व्यवस्थापकं प्रति पत्रमेकं लिखत ।

44) अस्य श्लोकस्य अन्वयं लिखत — 3

विद्या ददाति विनयं

विनयाद्याति पात्रताम् ।

पात्रत्वाद्धनमाप्नोति

धनाद्धर्मं ततः सुखम् ॥

www.careerindia.com

CAREERINDIA



45) यथानिर्देशं कुरुत — ( **त्रयाणामेव** ) 3 × 1 = 3

i) ………………… नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः । ( रिक्तस्थानं पूरयत )

ii) दशरथस्य पुत्रः ………………… । ( समस्तपदं लिखत )

iii) …………… + उपकारः = परोपकारः । ………………… सन्धिः । ( रिक्तस्थानं पूरयत )

iv) कर्णभारम् कृतिः; कवेः नाम ………………… ।

46) परिच्छेदमिमं पठित्वा आवरणस्थानि पदानि चित्वा परिच्छेदं पूरयत — 4

जगद्गुरुशङ्कराचार्याः केरलेषु पूर्णा नद्याः तटे विद्यमानं ………………… नामकं ग्रामं स्वजन्मना अलञ्चकार । तस्य पिता परमभागवतः ………………… । माता च सती आर्याम्बा । गुरुकुलम् उपनीतः शङ्करः द्वित्रैरेव वर्षैः सर्वान् ………………… , वेदाङ्गानि ………………… च अधीतवान् । शङ्करः ………………… दृढमतिरभवत् । ………………… तीरे तपस्यन्तं गुरुं ………………… शरणमुपगतवान् । ततः सर्वत्र सञ्चरन् स्वमतम् ………………… लोके प्रचारयामास ।

( गोविन्दभगवत्पादं, नर्मदा, अद्वैतं, संन्यासे, कालटि, वेदान् , शिवगुरुः, विविधभाषाः )

www.careerindia.com